श्रीअरविन्दः

# श्रीमाता

संस्कृतकार्यालयः
श्रीअरविन्दाश्रमः, पुदुच्चेरी

श्रीअरविन्दस्य The Mother इति पुस्तकस्य संस्कृतानुवादः
अनुवादकौ जगन्नाथवेदालङ्कारः नरेन्द्रः च
प्रथमसंस्करणम् १९९४, द्वितीयावृत्तिः २०११
Rs 20
ISBN 978-81-7058-338-7
© सर्वेऽधिकाराः श्रीअरविन्दाश्रम-न्यासेन स्वायत्तीकृताः १९९४
प्रकाशकः संस्कृतकार्यालयः, श्रीअरविन्दाश्रमः, पुदुच्चेरी ६०५००२
मुद्रकः श्रीअरविन्दाश्रम-मुद्रणालयः, पुदुच्चेरी

---

*Srimata* (Sanskrit), *The Mother* by Sri Aurobindo
Translators: Jagannath Vedalankar and Narendra

First published by Sri Aurobindo Society
Published by Sanskrit Karyalaya, a unit of Sri Aurobindo Ashram Publication Department 1994
Second impression 2011

© Sri Aurobindo Ashram Trust 1994

Published by Sanskrit Karyalaya, a unit of Sri Aurobindo Ashram Publication Department, Pondicherry 605002
Web http://sanskrit.sriaurobindoashram.org.in

Printed at Sri Aurobindo Ashram Press, Pondicherry
PRINTED IN INDIA

# १

द्वे एव शक्ती परस्परयोगेन अस्माकं प्रयासस्य लक्ष्यभूतं सुमहत् सुदुष्करं च कार्यं साधयितुं समर्थे—एका अविचला, अविच्छिन्ना अभीप्सा या निम्नतः आवाहयति, अपरा ऊर्ध्वतः अवतरन्ती परमा भगवत्कृपा या प्रत्युत्तरं ददाति।

किन्तु परमा भगवत्कृपा सत्यस्य प्रकाशस्य च अवस्थासु एव कार्यं कर्तुं शक्नोति। असत्यम् अज्ञानं च तस्यां याः अवस्थाः आरोपयतः तासु सा निजकार्यं न करिष्यति। यतो हि यदि सा असत्यस्य अभियाचनाः स्वीकुर्यात् तर्हि सा निजोद्देश्यं स्वयमेव नाशयेत्।

सत्यस्य ज्योतिषश्च अवतरणार्थं सन्ति काश्चन अपरिहार्याः अनन्याः च अवस्थाः यासु एव परमा शक्तिः अवतरिष्यति।

किञ्च ऊर्ध्वतः अवतरन्ती, निम्नतः उन्मीलन्ती सर्वोच्चविज्ञान-शक्तिः (अतिमानसशक्तिः) एव भौतिकप्रकृतिं विजित्य सफलतया तां चालयितुं तदीयबाधाश्च निर्मूलयितुं शक्नोति। . . . ताः अवस्थाः तावत् इमाः—समग्रं सत्यनिष्ठं च समर्पणम्, भागवतशक्तिं प्रति अनन्यम् आत्मोद्घाटनम्, अवतरणपरस्य सत्यस्य सततं सर्वात्मना च वरणम्, मानसिक-प्राणिक-भौतिकस्तराणां याः शक्तयः मायिकाकृतयश्च अद्यापि पार्थिवप्रकृतौ शासनं कुर्वन्ति तासाम् असत्यस्य सततं सर्वात्मना च वर्जनम्। अनिवार्यतया अपेक्षिताः एताः अवस्थाः।

समर्पणं सम्पूर्णं स्यात्, सत्तायाः सकलान् भागान् अधिकुर्यात्। अन्तरात्मा प्रत्युत्तरं दद्यात्, ऊर्ध्वतरमनः स्वीकुर्यात्, अथवा अन्तःप्राणः नतः स्यात् आन्तरदैहिकचेतना च प्रभावम् अनुभवेत् इति एतत् न पर्याप्तम्। सत्तायाः कस्मिन् अपि भागे, बाह्यातिबाह्ये स्तरेऽपि, ईदृशं किमपि तत्त्वं न स्यात् यत् सङ्कोचपूर्वकम् आत्मानम् अवशेषयेत्, संशय-व्यामोहानां छल-छद्मनां च पृष्ठतः आत्मानं गोपयेत्, विद्रोहं प्रतिषेधं वा कुर्यात्।

यदि सत्तायाः भागविशेषः आत्मसमर्पणं करोति किन्तु

अन्यभागः आत्मानम् अवशेषयति, स्वमार्गम् अनुसरति अथवा अभियाचनां करोति तर्हि यतिवारम् एतत् घटते ततिवारं यूयं भगवत्कृपां स्वस्माद् दूरीकुरुथ इति बोद्धव्यम्।

यदि यूयं स्वभक्तिसमर्पणयोः पृष्ठे स्वकीयकामनाः, अहम्मयीः अभियाचनाः, प्राणिकान् आग्रहान् प्रच्छादयथ, सत्याभीप्सायाः स्थाने इमानि वस्तूनि स्थापयथ अथवा तया सह मिश्रयथ, इमानि च भागवतशक्तौ आरोपयितुं यत्नं कुरुथ, तर्हि युष्माकं रूपान्तरार्थं भगवत्कृपायाः आवाहनं निरर्थकम् एव।

यदि यूयम् एकतः एकाङ्गे वा आत्मानं सत्यं प्रति उन्मीलयथ, अन्यतः सर्वदा विरोधिशक्तीः प्रति द्वाराणि उद्घाटयथ, तर्हि भगवत्कृपा युष्माभिः सह स्थायितया स्थास्यति इति आशा वृथा एव। यदि यूयं भगवन्तं जीवज्जाग्रद्रूपेण प्रतिष्ठापयितुम् इच्छथ तर्हि युष्माभिः मन्दिरं स्वच्छं स्थापनीयम्।

यदा यदा महाशक्तिः युष्मासु अवतरति सत्य च आनयति तदा तदा यदि यूयं पराङ्मुखाः भवथ, निष्कासितम् असत्यं पुनः आह्वयथ तर्हि भगवत्कृपा युष्माकं साहाय्यं न करोति इति यूयं दोषारोपणं कर्तुं न शक्नुथ। अत्र दोषार्हौ खलु युष्माकं सङ्कल्पस्य मिथ्याचारः समर्पणस्य अपूर्णता च।

यदि यूयं सत्यम् आह्वयथ किन्तु युष्माकं सत्तायाः कोऽपि भागः असत्यम्, अदिव्यम् अज्ञानमयं च वस्तु वरयति अथवा तत् पूर्णतया बहिष्कर्तुम् अनिच्छाम् एव करोति तर्हि युष्माकं द्वारं विरोधिशक्तेः आक्रमणार्थं सदा उद्घाटितं स्थास्यति भगवत्कृपा च युष्मत्तः अपसरिष्यति। युष्मासु यत् किमपि असत्यम्, तमोमयं तत् प्रथमम् अन्विष्य तस्य परित्यागं सततं कुरुत। तदा एव यूयं स्वकीयरूपान्तरार्थं भागवतशक्तेः यथायथम् आह्वानं कर्तुं शक्नुथ।

एतद् न चिन्तनीयं यद् भगवते निवेदित-गृहे सत्यम् असत्यं च, प्रकाशः अन्धकारश्च, समर्पणं स्वार्थपरता च सह एव निवासार्थम् अनुमन्तुं शक्यन्ते। रूपान्तरं नूनं सर्वाङ्गीणं स्यात्, अतः यत् किमपि तस्य प्रतिरोधकं तत्सर्वस्य वर्जनं सर्वाङ्गीणं भवेत्।

यूयं परमेश्वर-निर्धारितान् नियमान् न पालयिष्यथ किन्तु भागवतशक्तिः युष्माकम् इच्छानुसारेण युष्मत्कृते सर्वं करिष्यति, कर्तव्यम् एव तया इति इयं·मिथ्या धारणा सर्वथा त्यज्यताम्। आत्मसमर्पणं सत्यं सम्पूर्णं च कुरुत। तदा एव युष्मत्कृते अन्यत् सर्वं करिष्यते।

भागवतशक्तिः युष्माकम् अर्थे समर्पणम् अपि करिष्यति

इति इयम् असत्या, आलस्यपूर्णा धारणापि सर्वथा त्यज्यताम्। परमेश्वरः भागवतशक्तिं प्रति युष्माकं समर्पणम् अपेक्षते किन्तु स तद् बलाद् न आरोपयति। यावत् रूपान्तरं स्थायि न भवति तावत् यूयं भगवन्तम् अस्वीकर्तुम्, परित्यक्तुम् अथवा तं प्रति कृतं स्वकीयम् आत्मदानं परावर्तयितुं प्रतिक्षणं स्वतन्त्राः यदि नाम यूयम् आध्यात्मिक-परिणामं सोढुं प्रस्तुताः। युष्माकं समर्पणं स्वतन्त्रं स्वेच्छाकृतं च भवेत् न तु कस्यापि जडस्य स्वयंचलित-यन्त्रस्य यान्त्रिकोपकरणस्य वा।

भ्रान्तिवशात् तामसिक-निश्चेष्टता सदैव सत्यसमर्पणं मन्यते, किन्तु तामसिक-निश्चेष्टता-गर्भात् किमपि सत्यम्, शक्तिमद् वस्तु उद्भवितुं न शक्नोति। भौतिकप्रकृतेः तामसिक-निश्चेष्टता एव अज्ञानस्य अदिव्यस्य वा प्रभावस्य क्रीडनकं भवति। भागवतशक्तेः कार्यार्थम् अपेक्ष्यते सानन्दम्, समर्थं सहायकं च समर्पणम्, सत्य-ज्ञानदीप्तसाधकस्य आज्ञानुवर्तित्वम्, असत्यान्धकारविरुद्धं सङ्ग्रामशीलस्य अन्तर्योधस्य, भगवतः विश्वस्तसेवकस्य आज्ञानुवर्तित्वम्।

अयमेव यथार्थमनोभावः। ये एनं धारयितुम्, परिपालयितुं समर्थाः तेषामेव श्रद्धा नैराश्यविपत्तिषु अविचला तिष्ठति। ते एव परमविजयं सुमहद् रूपान्तरं च प्राप्तुम् अर्हन्ति।

# २

विश्वे यत् किमपि क्रियते, सकलकर्मणां पृष्ठतः भगवान् निजशक्तिम् आश्रित्य वर्तते। किन्तु सः निजयोगमायया आवृतः, अपराप्रकृतौ च जीवस्य अहङ्कारमाध्यमेन कार्यं करोति।

योगेऽपि भगवान् एव साधकः साधना च। तस्य शक्तिः स्वकीयं ज्योतिः, बलम्, ज्ञानम्, चैतन्यम् आनन्दं च अवलम्ब्य आधारे कार्यं करोति, यदा च आधारः तां प्रति उन्मुक्तः भवति तदा सः इमाः दिव्यशक्तीः तत्र वर्षति तेन च साधना सम्भवति। किन्तु यावत् अपराप्रकृतिः (निम्नप्रकृतिः) सक्रिया वर्तते तावत् साधकस्य वैयक्तिकप्रयत्नः आवश्यकः।

एषः वैयक्तिकप्रयत्नः त्रिविधः—अभीप्सा, परित्यागः, समर्पणं च।

**अभीप्सा** जागरूका, अविरता, अविच्छिन्ना स्यात्। अभीप्सा नाम भगवत्प्राप्तये मनसः सङ्कल्पः, हृदयस्य गवेषणा, प्राणसत्तायाः स्वीकारः, भौतिकीं चेतनां प्रकृतिं च उन्मोचयितुं सुनम्यां च कर्तुं सङ्कल्पः।

**परित्यागः** नाम अपराप्रकृतेः वृत्तीनां वर्जनम्—मनसः विचाराः, अभिप्रायाः, अभिरुचयः, अभ्यासाः, परिकल्पनाः इति एषां वर्जनं येन यथार्थज्ञानं नीरवमनसि निर्बाधम् अवकाशं प्राप्नुयात्,—प्राणिकप्रकृतेः कामनाः, अभियाचनाः, लालसाः, संवेदनाः, आवेगाः, स्वार्थपरता, अभिमानः, दर्पः, कामवासना, लोभः, ईर्ष्या, असूया, सत्यस्य विरोधः इत्येषां वर्जनं येन शान्त-निश्चल-विशाल-समर्थ-समर्पित-प्राण-सत्तायाम् ऊर्ध्वतः यथार्थशक्त्यानन्दयोः वृष्टिः स्यात्,—भौतिकप्रकृतेः मूढता, संशयः, अविश्वासः, अन्धता, दुराग्रहः, क्षुद्रता, आलस्यम्, परिवर्तनविमुखता, तामसिकता इत्येषां वर्जनं येन ज्योतिःशक्त्यानन्दानां सत्या सुस्थिरावस्था सततम् अधिकाधिकं च दिव्यताम् आपद्यमाने शरीरे आत्मानं प्रतिष्ठापयितुं पारयेत्।

**समर्पणं** नाम भगवन्तं भागवतशक्तिं च प्रति आत्मनः निवेदनम्—वयं यत् किमपि स्मः, अस्माकं यत् किमपि अस्ति तस्य सर्वस्य, चेतनायाः प्रत्येकस्तरस्य क्रियामात्रस्य च निवेदनम्।

*
**

यथा यथा साधकस्य समर्पणम् आत्मनिवेदनं च वर्धेते तथा तथा सः स्वचेतनायां भागवतशक्तिः साधनां करोति, तस्मिन् आत्मानम् अधिकाधिकम् अभिवर्षति, भागवतप्रकृतेः मुक्तिं पूर्णतां च प्रतिष्ठापयति इति अनुभवति। इयं सचेतन-प्रक्रिया साधकस्य स्वकीयप्रयत्नस्य, स्थानं यावद् अधिकम् अधिकरोति तावत् तस्य प्रगतिः द्रुततरा सत्यतरा च भवति। परन्तु यावत् समर्पणम् आत्मनिवेदनं च आमूलचूलं विशुद्धे परिपूर्णे च न भवतः तावत् इयं प्रक्रिया वैयक्तिक-प्रयत्नस्य आवश्यकतां पूर्णतया निराकर्तुं न शक्नोति।

इदम् अवधेयम्—यत् तामसिकं समर्पणं विनियमानां पालनं निराकरोति, 'भगवान् एव सर्वं कुर्यात्, निखिलकष्टेभ्यः समस्तसङ्कटेभ्यश्च तारयेत्' इति यत् समर्पणं तत् खलु आत्मप्रवञ्चनम्; तत् मुक्तिं सिद्धिं च न प्रापयति।

# ३

जीवनपथे सकल-भय-विपत्-सङ्कटानां विरुद्धं कवचावृतवद् विचरणाय नित्यसहचरं तत्त्वद्वयम् आवश्यकम् —भगवत्याः श्रीमातुः कृपा, श्रद्धा-सत्यनिष्ठा-समर्पणमयी युष्माकम् अन्तःस्थितिः च। शुद्धा, सरला, निर्दोषा भवतु युष्माकं श्रद्धा। महत्त्वाकाङ्क्षा, गर्वः, मिथ्याभिमानः, मानसिकम् औद्धत्यम्, प्राणिकी स्वैरता, वैयक्तिकी अभियाचना, अपराप्रकृतेः तुच्छतुष्टीनां कामना इति एतैः कलुषिता मनःप्राणमयपुरुषयोः अहम्मयी श्रद्धा खलु निम्ना, धूमाच्छन्ना अग्निशिखा या स्वर्गं प्रति उज्ज्वलितुम् असमर्था। स्वजीवनं भगवत्कार्यार्थं भगवदभिव्यक्तौ साहाय्यप्रदानार्थं च प्राप्तम् इति भावयत। मा काङ्क्षत अन्यत् किमपि, काङ्क्षत

केवलं भगवच्चेतनायाः पावित्र्यम्, शक्तिम्, ज्योतिः, विशालताम्, निश्चलशान्तिम्, आनन्दम्, युष्माकं देहप्राणमनसां रूपान्तरं पूर्णत्वं च साधयितुं तस्याः साग्रहप्रयासम्। न प्रार्थनीयम् अन्यत् किमपि, प्रार्थनीयं केवलं दिव्यम्, आध्यात्मिकं विज्ञानमयं च सत्यम्, तस्य चरितार्थता भूतले, निजात्मनि, तेषु सर्वेषु ये भगवता आहूताः वृताश्च, प्रार्थनीयाः ताः परिस्थितयः याः सत्यस्य सृष्टये समस्तविरोधिशक्तिषु तस्य विजयार्थं च अपेक्षिताः।

युष्माकं सत्यनिष्ठा समर्पणं च यथार्थे समग्रे च भवताम्। यदा यूयम् आत्मानं दत्थ, दत्त तदा सर्वात्मना, विना अभियाचनाम्, विना विनियमम्, विना अवशेषं येन युष्मदन्तःस्थं सर्वं भगवत्याः श्रीमातुः एव भवेत्, न किमपि शिष्येत अहङ्काराय न वा किमपि दीयेत कस्यैचिद् अन्यशक्तये।

युष्माकं श्रद्धा, सत्यनिष्ठा समर्पणं च यावत् पूर्णतराणि स्युः तावद् एव कृपा सुरक्षा च युष्माभिः सह भविष्यतः। यदा भगवत्याः श्रीमातुः कृपा सुरक्षा च युष्माभिः सह वर्तेते तदा किं नाम तद् यद् युष्मान् स्प्रष्टुं प्रभवेत् कस्माद् वा भेतव्यं युष्माभिः? अस्य धर्मस्य स्वल्पमपि युष्मान् सकलविघ्नबाधाविपत्तिभ्यः तारयिष्यति। अस्य पूर्णसान्निध्येन परिवृताः यूयं

स्वमार्गे सुरक्षितं गन्तुं शक्नुथ यतो हि सः श्रीमातुरेव मार्गः। न स्थास्यति युष्माकं विभीषिकामात्रस्य चिन्ता। अस्य जगतः अदृश्यजगतां वा कोऽपि शत्रुः, कामं यावदपि पराक्रमी स्यात्, युष्मान् स्प्रष्टुं न शक्ष्यति। श्रीमातुः कृपायाः स्पर्शः विघ्नान् सुयोगेषु, विफलतां साफल्ये, दुर्बलताम् अमोघसामर्थ्ये परिणमयितुं शक्नोति। यतो हि भगवत्याः श्रीमातुः कृपा परमेश्वरस्य अनुमतिः, अद्य वा श्वः वा तस्याः फलं सुनिश्चितम्, तत् खलु विधिनिर्दिष्टम्, अपरिहार्यम् अप्रतिरोध्यं च।

# ४

धनम् एकस्याः विश्वशक्तेः प्रत्यक्षप्रतीकम्। इयं शक्तिः भूतले आविर्भूय प्राणमये अन्नमये च स्तरे क्रियां करोति। अपरिहार्या इयं बाह्यजीवनस्य पूर्णप्रस्फुटनार्थम्। मूलतः यथार्थक्रियादृष्ट्या च इयं भगवतः एव शक्तिः। किन्तु भगवतः अन्यशक्तयः इव इयम् अपि अत्र पराधीना। निम्नप्रकृतेः अज्ञाने एषा मानवेन अहङ्कारस्य उपयोगार्थं बलाद् अपहर्तुं पार्यते अथवा असुरशक्तिभिः स्वप्रभावैः अधिकृत्य विकृत्य च निजोद्देश्यार्थं प्रयोक्तुं शक्यते। इयं खलु धन-प्रभुत्व-कामवासनात्मिकासु तासु तिसृषु शक्तिषु अन्यतमा याः मानवस्य अहङ्काराय असुराय च प्रबलतमाकर्षणयुक्ताः। आसां धारकाः सामान्यतया आसु अनुचितरीत्या अधिकारं स्थापयन्ति आसां दुरुपयोगं च कुर्वन्ति। धनस्य अभिलाषिणः

तस्य रक्षकाः वा प्रायेण न धनस्य अधिकारिणः अपि तु तेन अधिकृताः भवन्ति। बहुकालात् असुरेण अधिकृतस्य दुरुपयुक्तस्य च धनस्य दूषितप्रभावात् विरलाः एव आत्मानं रक्षितुं शक्नुवन्ति। अत एव प्रायः सर्वाः अपि आध्यात्मिक-साधनापद्धतयः धनविषये पूर्णतया आत्मसंयमम् अनासक्तिं च कुरुत, धनं प्रति समस्तबन्धनानि, वित्तैषणायाः सकलां वैयक्तिकीम् अहम्मयीं च वासनां त्यजत इति साग्रहम् उपदिशन्ति। तासु काश्चन धनसम्पदोः स्पर्शमपि निषेधन्ति; दारिद्र्यं जीवनस्य रिक्ततां च अनन्याम् आध्यात्मिकावस्थाम् उद्घोषयन्ति। किन्तु इयं भ्रान्तिः एव। अनया धनशक्तिः विरोधिशक्तीनां हस्ते एव तिष्ठति। यतो हि इयं भगवतः शक्तिः, तस्मै अस्याः पुनर्जयः, दिव्यजीवनार्थं दिव्यतया अस्याः उपयोगः साधकाय विज्ञानमयमार्गः।

धनशक्तेः, तल्लब्धात् साधनसम्भारात् भोग्यसमूहात् च युष्माभिः वैरागिवत् जुगुप्सापूर्वकं पराङ्मुखैः न भाव्यम्, नापि तेषु राजसिकी आसक्तिः न वा तेषां भोगे निरता दासत्वकारि-वृत्तिः पोषणीया। धनम् एका शक्तिः या श्रीमातुः अर्थे पुनर्जेतव्या तस्याः सेवार्थं च तस्यै समर्पणीया—धनं प्रति इयं दृष्टिः स्याद् युष्माकम्।

सर्वमपि धनं भगवतः एव। ये तस्य धारकाः ते न्यासिनः न तु स्वामिनः। अद्य इदं तेषां हस्ते वर्तते श्वः अन्यत्र भवितुं शक्नोति। यावत् अयं न्यासः तेषां पार्श्वे अस्ति तावत् तस्य निभालनं ते कया रीत्या केन भावेन च कुर्वन्ति, कया चेतनया कस्मै प्रयोजनाय च तस्य उपयोगं कुर्वन्ति—इदमेव अवलम्बते सर्वम्।

यत् किमपि युष्माकं सकाशे अस्ति, यत् किमपि युष्माभिः प्राप्तं सङ्गृहीतं वा तत्सर्वं श्रीमातुः एव इति अयं भावः धनस्य व्यक्तिगत-व्यवहारसमये स्याद् युष्माकम्। मा क्रियताम् अभियाचना, अपि तु यत् किमपि तस्याः सकाशात् प्राप्नुथ तत् स्वीक्रियताम् उपयुज्यतां च तेषु एव कार्येषु यदर्थं तद् युष्मभ्यं प्रदत्तम्। भवत सर्वथा निःस्वार्थाः, नितान्तं न्याय-निष्ठाः, यथायथकारिणः, सूक्ष्मांशेषु सावहिताः, श्रेष्ठन्यासिनः। अवधेयम् इदं सदैव यत् यूयं तस्याः एव सम्पत्तिं व्यवहरथ न तु स्वकीयाम्। अपरतः, यत् किमपि तस्याः अर्थे प्राप्नुथ तत् तस्याः समक्षं भक्तिपूर्वकं निवेदयत, तन्मध्यात् किमपि स्वस्य अन्यस्य वा अर्थे मा व्यवहरत।

धनस्य अर्थे धनिकानां समक्षं मस्तकं मा अवनमयत, नापि तेषाम् आडम्बरेण, धनबलेन प्रभावेण वा अभिभूताः

भवत। यदा यूयं श्रीमातुः अर्थे किमपि याचथ तदा एतद् अनुभवनीयं यत् सा एव स्वकीयसम्पदः स्वल्पभागं युष्मद्द्वारा अभ्यर्थयति, अपि च यः एवं याच्यते सः स्वप्रत्युत्तरेण परीक्षिष्यते।

यदि यूयं धनकलङ्कात् मुक्ताः, धनात् सन्न्यासिनां या निवृत्तिः तया च पूर्णतया रहिताः, तर्हि दिव्यकर्मणे धनजयाय महत्तरा शक्तिः युष्माकं भविष्यति। मनसः समत्वम्, अभियाचनायाः अभावः, यत् किमपि युष्माकम् अस्ति, यत् किमपि यूयं प्राप्नुथ यत् च युष्माकं धनोपार्जनसामर्थ्यम्, तस्य सर्वस्यापि भागवतशक्तिं प्रति, तस्याः कार्यं प्रति पूर्णसमर्पणम् इति इमानि अस्याः मुक्तेः लक्षणानि। धनस्य तदुपयोगस्य च विषये मनसः कोऽपि क्षोभः, कापि लालसा, कापि अनिच्छा कुत्रापि अपूर्णतायाः बन्धनस्य वा सुनिश्चितं चिह्नम्।

अस्मिन् विषये आदर्शसाधकः खलु सः यः प्रयोजने सति दरिद्रवत् जीवनं यापयितुं शक्नोति अथ च कोऽपि अभाव-बोधः तं न स्प्रक्ष्यति, नापि सः अभावबोधः तदीयान्तरे दिव्यचेतनायाः अबाधलीलायां हस्तक्षेपं करोति। यदि तेन धनिवत् जीवनं यापनीयं भवेत्, तदपि सः कर्तुं शक्नोति अथ च धनस्य निजव्यवहृतवस्तूनां वा लालसायाम् आसक्त्यां वा,

असंयतप्रवृत्त्याः दासत्वे अथवा धनस्वामित्वजनिताभ्यासानां विवशबन्धने क्षणमपि न पतति। भगवदिच्छा भागवतानन्दश्च तस्य सर्वस्वम्।

विज्ञानमयसृष्टौ (अतिमानससृष्टौ) धनशक्तिः भागवत-शक्त्यै प्रत्यर्पणीया। भगवती श्रीमाता निजसर्जनशीलदृष्टौ तस्याः प्रयोगस्य यं विधिं निर्धारयति तेनैव तस्याः उपयोगः नवीन-दिव्यीकृत-प्राणिक-भौतिक-जीवनयोः सत्य-सुन्दर-सुसमञ्जस-सज्जा-सुव्यवस्थाकृते करणीयः। परन्तु पूर्वं धन-शक्तिः तस्यै विजित्य प्रत्यानेतव्या। अस्य विजयस्य अर्थे ते एव शक्तिशालितमाः ये स्वप्रकृतेः अस्मिन् भागे सुदृढाः, विशालाः अहङ्कारमुक्ताश्च, ये च कामपि अधियाचनाम्, कमपि स्वत्वावशेषं सङ्कोचं वा विना समर्पितात्मानः, परमामोघशक्तेः विशुद्ध-शक्तिशालि-यन्त्राणि च।

## ५

यदि यूयं दिव्यकर्मणां यथार्थकर्मिणः भवितुम् इच्छथ तर्हि कामनामात्रात् स्वार्थैकदर्शिनः अहङ्कारात् च पूर्णमुक्तिः एव युष्माकं प्रथमं लक्ष्यं स्यात्। युष्माकं समग्रं जीवनं परमेश्वरं प्रति समर्पणं यज्ञः च भवेत्। कर्मणि युष्माकम् एकमात्रलक्ष्यं स्यात् भागवतशक्तेः लीलायां तस्याः सेवा, स्वीकृतिः, चरितार्थता तदभिव्यञ्जक-यन्त्रत्वलाभश्च। युष्माभिः दिव्य-चेतनायाम् उत्तरोत्तरं विकासः प्राप्तव्यः येन अन्ततः युष्माकं तस्याः च इच्छायां कोऽपि भेदः न स्यात्, युष्मासु तस्याः प्रेरणातिरिक्तः कोऽपि सङ्कल्पः न तिष्ठेत्, ईदृशं किमपि कर्म युष्मासु युष्मद्द्वारा च न भवेत् यत् तस्याः सचेतनकर्म न स्यात्।

यावद् यूयम् इदं सम्पूर्ण-सक्रिय-तादात्म्यं स्थापयितुं न शक्नुथ तावद् आत्मानं श्रीमातुः सेवार्थं सृष्टः जीवः देहश्चेति भावयत यः सर्वं तस्याः प्रीत्यर्थम् एव करोति। यदि पृथक्कर्तृत्वबुद्धिः युष्मासु प्रबला स्यात्, यदि 'अहं करोमि' इति अनुभूतिः युष्माकं भवेत् तथापि सकलं कर्म तस्याः अर्थे एव करणीयम्। अहङ्कारस्य अभिरुचेः सर्वमपि प्राबल्यम्, वैयक्तिकलाभस्य समस्तलालसा, स्वार्थैकदर्शि-कामनायाः सर्वापि प्रत्याशा स्वप्रकृतेः निर्मूलनीया। न तिष्ठेत् युष्मासु फलकामना, न कापि पुरस्कारस्पृहा लेशतोऽपि। भगवत्याः श्रीमातुः प्रसन्नता, तस्याः कर्मणः सिद्धिः युष्माकम् एकमात्रफलं स्यात्, दिव्यचेतना-शक्ति-शान्त्यानन्देषु सततप्रगतिः युष्माकम् अनन्यपुरस्कारः। सेवायाः आनन्दः, कर्ममाध्यमेन अन्तर्विकासस्य आनन्दः निःस्वार्थकर्मिणः अर्थे पर्याप्त-प्रतिफलम्।

परम् आयास्यति स समयः यदा इयम् अनुभूतिः अधिकाधिकं भविष्यति यद् यूयं यन्त्राणि न तु कर्मिणः। यतो हि पूर्वम् अनन्यभक्तिबलेन भगवत्या श्रीमात्रा सह युष्माकं सम्बन्धः तथा घनिष्ठः भविष्यति यथा कस्मिन्नपि काले केवलम् एकाग्रीभूय सकलम् अपि तद्हस्तयोः समर्पयन्तः

यूयं तत्क्षणं तस्याः सद्यः मार्गनिर्देशम्, प्रत्यक्षम् आदेशं प्रेरणां वा प्राप्स्यथ, किञ्च कर्तव्यकर्मणः, तस्य सम्पादनस्य तत्फलस्य च स्पष्टसङ्केतम् अपि आसादयिष्यथ। ततश्च यूयम् अनुभविष्यथ यत् भागवतशक्तिः न केवलं युष्माकं कार्याणि प्रेरयति प्रचालयति च, परन्तु प्रवर्तयति सम्पादयति चापि। युष्माकं सर्वाः अपि क्रियाः तस्याः एव उद्भवन्ति, युष्माकं सर्वाः अपि शक्तयः तस्याः एव, युष्माकं देहप्राणमनांसि तदीयकार्यस्य सचेतन-सानन्द-यन्त्राणि, तदीयलीलासाधनानि, स्थूलजगति तदभिव्यक्तये सञ्चकरूपाणि। अस्मात् ऐक्यात् अवलम्बात् च अन्या सुखतरा अवस्था नैव सम्भवति। यतो हि अस्मिन् पदन्यासः अज्ञानगत-सङ्घर्षमय-क्लेशसङ्कुल-जीवनस्य सीमारेखायाः परतः युष्माकम् अध्यात्मसत्तायाः सत्यम्, तस्याः गभीरशान्तिं प्रगाढानन्दं च प्रापयति।

यदा इदं रूपान्तरं प्रवर्तते तदा यूयम् अहङ्कारस्य समस्त-विकृतिदोषेभ्यः आत्मानं मुक्तं रक्षत इति विशेषेण अवधातव्यम्। कापि अभियाचना आग्रहपरता वा युष्माकम् आत्मदानस्य आत्मोत्सर्गस्य च निर्मलतां कलङ्कयितुं युष्मासु अलक्षितं न प्रविशेत्। न स्यात् कापि आसक्तिः कर्मणि तत्फले वा, न स्यात् कोऽपि पणबन्धः, न स्यात् कापि

अभ्यर्थना तां शक्तिम् अधिकर्तुं या युष्मान् अधिकुर्यात्, न स्यात् यन्त्रभावस्य गर्वः, वृथाभिमानः दर्पः वा। नैतत् सहनीयं युष्माभिः यत् युष्माकं मनसि प्राणे वा शरीरस्य अङ्गेषु वा विद्यमानं किमपि युष्मासु क्रियारतानां शक्तीनां महत्तां विकृत्य स्वकार्यार्थं व्यवहरेत् अथवा तां स्वकीय-पृथग्व्यक्तिगत-तुष्टये अधिकुर्यात्। युष्माकं श्रद्धा, सत्यनिष्ठा, अभीप्सायाः शुद्धता चरमा परमा च स्यात्; व्याप्नुवन्तु ताः युष्माकं सत्तायाः सकलस्तरान् निखिलभूमिकाश्च। तथा सति प्रत्येकं विक्षोभकारि तत्त्वं विकृतिजनक-प्रभावश्च युष्माकं प्रकृतेः क्रमशः अपगमिष्यति।

अस्याः सिद्धेः अन्तिमावस्था तदा एव आगमिष्यति यदा यूयं भगवत्या श्रीमात्रा सह पूर्णतया एकीभविष्यथ आत्मानं च पूर्ववत् अपरम्, पृथग्भूतं व्यक्तिविशेषम्, यन्त्रम्, सेवकं कर्मिणं वा न अनुभवन्तः वस्तुतः श्रीमातुः एव शिशुम्, तस्याः चेतनायाः शक्तेश्च सनातनांशम् अनुभविष्यथ। सदैव सा युष्मासु निवत्स्यति यूयं च तस्याम्। इयं सतत-सरल-स्वाभाविकी अनुभूतिः भविष्यति यत् युष्माकं सकलम् अपि चिन्तनम्, अवलोकनं कर्म च, युष्माकं श्वासोच्छ्वासः अङ्ग-भङ्गिः वा तस्याः एव उद्भवन्ति तस्याश्च सन्ति। इदमपि

बोधिष्यथ, द्रक्ष्यथ, अनुभविष्यथ यत् यूयं तया एव स्वगर्भात् सृष्टाः व्यक्तयः शक्तयश्च, तया एव लीलार्थं स्वान्तरात् बहिरानीताः सन्तोऽपि यूयं सदा तदन्तरे सुरक्षिताः; युष्माकं सत्ता, चेतना, शक्तिः आनन्दश्च तस्याः एव सत्तायाः, चेतनायाः, शक्तेः आनन्दस्य च अंशः। यदा इयं स्थितिः पूर्णतां प्राप्स्यति तस्याः विज्ञानमय-शक्तयश्च युष्मान् निर्बाधं परिचालयितुं शक्ष्यन्ति तदा यूयं दिव्यकर्मसु सिद्धकर्मिणः भविष्यथ। युष्माकं ज्ञानम्, सङ्कल्पः, कर्म अमोघम्, सरलम्, ज्योतिर्मयम्, सहजस्फुरितं निर्दोषं च भविष्यति; एतत् सर्वमपि परमेश्वरात् विनिःसृतः प्रवाहः, सनातनस्य दिव्यगतिः भविष्यति।

## ६

श्रीमातुः चतस्रः शक्तयः तस्याः चतस्रः प्रमुखाः व्यक्तित्व-मूर्तयः, तदीयदिव्यतायाः अंशाः विग्रहाश्च यद्द्वारा सा स्वसृष्टजीवेषु कार्यं करोति, लोकलोकान्तरेषु स्वीयसृष्टवस्तुषु सुव्यवस्थां सामञ्जस्यं च स्थापयति निजशक्तिसहस्राणां च तत्तत्कार्यनिर्देशं करोति। माता एका एव, किन्तु सा अस्माकं सम्मुखे नानारूपैः आविर्भवति। अनेकाः तस्याः शक्तयः व्यक्तित्वमूर्तयश्च, बहवः तस्याः अंशसम्भूतयः विभूतयश्च याः विश्वे तदीयकार्यं कुर्वन्ति। याम् अद्वितीयां वयं माता इति आराधयामः सा खलु सकलजगदधिष्ठात्री भगवतः चिच्छक्तिः। एकापि सा तथा अनेकरूपा यथा तस्याः गतेः अनुसरणं क्षिप्रतममनसः, मुक्ततम-विशालतम-बुद्धेः कृतेऽपि

असम्भवम्। श्रीमाता परमेश्वरस्य चेतना शक्तिश्च, स्वीय-सकलसृष्टेः अत्यन्तम् ऊर्ध्वस्था सा। किन्तु तस्याः गतिविधीनां कश्चिद् अंशः तदीयविग्रहेषु द्रष्टुम् अनुभवितुं च शक्यते। कृपावशात् स्वसृष्टजीवानां समक्षं यानि दिव्यरूपाणि धृत्वा सा आविर्भूता तेषु अपि तदीयांशः द्रष्टुम् अनुभवितुं च शक्यते। एते विग्रहाः रूपाणि च अधिकं बुद्धिग्राह्याणि यतो हि एषां स्वभावः कर्म च अधिकं निर्दिष्टं सीमितं च।

श्रीमातुः सत्ता त्रिविधा। इदं ज्ञानं युष्माकं तदा भविष्यति यदा यूयं तया चिन्मयशक्त्या सह एकात्मतायाः स्पर्शम् अनुभविष्यथ या अस्मान् अखिलब्रह्माण्डं च धारयति। विश्वातीता सा आद्या परा शक्तिः लोकानाम् उपरि तिष्ठन्ती इमां सृष्टिं परमेश्वरस्य सदाऽव्यक्तरहस्येन सह संयोजयति। सा विश्वव्यापिनी, विश्वरूपा महाशक्तिः इमानि सर्वभूतानि सृजति, इमाः सकलाः असङ्ख्याः शक्तीः क्रियाप्रक्रियाश्च धारयति, अनुप्रविशति, पोषयति परिचालयति च। व्यष्टिरूपिणी जीवभूता सा स्वसत्तायाः अनयोः द्वयोः विशालतर-रूपयोः शक्तिं मूर्तिमतीं करोति। सा इदं रूपद्वयं सजीवम्, अस्माकं निकटस्थं करोति, मानवव्यक्तित्वस्य दिव्यप्रकृतेश्च मध्यस्थतां विदधाति।

आद्या, अद्वितीया, परा शक्तिः श्रीमाता सकललोकेभ्यः ऊर्ध्वं विराजमाना निज-सनातन-चैतन्ये भगवन्तं पुरुषोत्तमं धारयन्ती आस्ते। सा एका एव चरम-परम-शक्तेः अनिर्वचनीय-भगवत्सन्निधेश्च आश्रयः। यानि सत्यानि अत्र प्रकटीकर्तव्यानि तानि सा आत्मनि धारयति समाह्वयति वा। यस्मिन् परमरहस्ये तानि अन्तर्हितानि आसन् तस्मात् तानि निजानन्तचेतनायाः प्रकाशम् अवतार्य स्वस्य सर्वशक्तिमत्तायाम् असीमप्राण-धारायां च तेभ्यः शक्त्यात्मकरूपम् अस्मिन् विश्वे आकारमेकं च प्रददाति। पुरुषोत्तमः तस्यां शाश्वतसच्चिदानन्दरूपेण सदा प्रकटितः, तन्माध्यमेन सः भुवनेषु ईश्वर-शक्त्यात्मक-द्वैताद्वैत-चैतन्यरूपेण पुरुष-प्रकृत्यात्मक-द्वैततत्त्वरूपेण च अभिव्यक्तः, तद्द्वारा सः लोकेषु, भूमिकासु, देवतासु तदीयशक्तिषु च मूर्तिमान् तथा ज्ञातेषु अन्येषु अज्ञातेषु च लोकेषु यत् किमपि अस्ति तस्मिन् सर्वस्मिन् सः आकारवान्। सर्वं तस्याः लीला पुरुषोत्तमेन सह, सर्वं खलु सनातनस्य रहस्यानाम् अनन्तस्य अद्भुतानां च तत्कृता अभिव्यक्तिः। सर्वं सा एव, यतो हि सर्वभूतानि भागवतचिच्छक्तेः अंशाः अविच्छेद्याङ्गानि च। अत्र अन्यत्र वा किमपि ईदृशं नैव सम्भवति यत् तया निर्णीतं परमेश्वरेण अनुमतं च न स्यात्। परमेश्वरेण प्रेरिता सा यत्

पश्यति, स्वसर्जनशीलानन्दे बीजरूपेण निक्षिप्य निर्माति च तदतिरिक्तं न किमपि रूपग्रहणे क्षमम्।

श्रीमाता स्वीय-विश्वातीत-चेतनाद्वारा परमेश्वरात् यत् किमपि अवतारयति तत् सा विश्वजननी-महाशक्तिरूपेण साकारं करोति स्वसृष्टलोकान् च अनुप्रविश्य तिष्ठति। तस्याः सान्निध्यं तान् लोकान् तया भागवतसत्तया ताभ्यां दिव्य-सर्वधारक-शक्त्यानन्दाभ्यां च परिपूर्य धारयति यदभावे तेषाम् अस्तित्वम् अपि सम्भवं न अभविष्यत्। यां वयं प्रकृतिं ब्रूमः सा खलु तस्याः बाह्यतमं कार्यनिर्वाहक-रूपमात्रम्। सा भगवती स्वस्य शक्तीः क्रियापद्धतीश्च सामञ्जस्यपूर्वकं व्यूहति समूहति च, प्रकृतेः कार्यव्यापारान् प्रेरयति, यत् किमपि द्रष्टुम्, अनुभवितुं जीवनधारायां सक्रियं कर्तुं वा शक्यं तस्मिन् सर्वस्मिन् सा गूढं व्यक्तं वा विचरति। प्रत्येकं लोकः तत्तल्लोकसंस्थानस्य तत्तद्ब्रह्माण्डस्य वा महाशक्तेः एकैका लीला एव, नान्यत् किमपि। सा महाशक्तिः तत्र विश्वातीतमातुः विराडात्मरूपेण विश्वमय-व्यक्तित्वरूपेण च विराजते। प्रत्येकं लोकः खलु किमपि ईदृशं वस्तु यत् तया स्वदिव्यान्तर्दर्शने दृष्टम्, शक्तिसौन्दर्यमये निजहृदये धारितं स्वीयानन्दे सृष्टं च।

किन्तु तस्याः सृष्टेः स्तराः अनेकाः, भागवतशक्तेः

सोपानानि अनेकानि। अस्मान् अङ्गरूपेण धारयतः अस्य व्यक्तजगतः शिखरे अनन्ततया सत्, चित्, शक्तिः, आनन्दः इति एषां लोकाः वर्तन्ते। तेषाम् उपरि श्रीमाता अनावृत-शाश्वत-शक्तिरूपेण अवस्थिता। तत्र सर्वाणि भूतानि अनिर्वचनीये पूर्णत्वे अपरिवर्तनीये एकत्वे च वसन्ति यतो हि तत्र सा निजभुजयोः तानि सर्वकालं सुरक्षितं धारयति। अस्माकं समीपतराः सन्ति सर्वाङ्गपूर्ण-विज्ञानसृष्टेः लोकाः येषु श्रीमाता विज्ञानमयी महाशक्तिः, दिव्य-सर्वज्ञ-सङ्कल्पस्य सर्वसमर्थ-ज्ञानस्य च शक्तिः या निजामोघकार्येषु नित्यप्रत्यक्षा प्रक्रियामात्रे च सहजतया पूर्णत्वसम्पन्ना। तत्र सकलगतयः सत्यस्य पादन्यासाः, तत्र सर्वभूतानि दिव्यज्योतिषः अंशभूताः आत्मानः, शक्तयः देहाश्च; तत्र सर्वेऽपि अनुभवाः प्रगाढ-परमानन्दस्य सागराः, परिप्लवाः कल्लोलाश्च। किन्तु सन्ति अत्र, यत्र वयं निवसामः, अज्ञानमयलोकाः, स्वचेतनायां निजोद्गमात् वियुक्तानां देहप्राणमनसां लोकाः। तेषु अर्थपूर्ण-केन्द्रम् इयं पृथ्वी, अस्याः क्रमविकासश्च एका मार्मिकी निर्णायकप्रक्रिया। श्रीमाता सकल-तमः-सङ्घर्ष-त्रुटिभिः परिपूर्णाम् एनां पृथिवीं धारयति, तस्याः गुप्तलक्ष्यं प्रति प्रेरयति परिचालयति च।

अज्ञानमयस्य अस्य त्रिविधजगतः महाशक्तिरूपिणी श्रीमाता मध्यवर्ति-स्तरमेकम् अधितिष्ठति। तस्य उपरि अस्ति विज्ञानमयज्योतिः, सत्यमयजीवनम्, सत्यमयसृष्टिः यत्सर्वम् अत्र अवतारणीयम्। अधश्च अस्ति चैतन्यस्तराणाम् आरोहिणी अवरोहिणी च क्रमपरम्परा। इमे स्तराः द्विविधसोपानपथवत् एकतः अधः जडतत्त्वस्य निर्ज्ञानतायाम् अवतीर्य तस्यां विलीयन्ते, अन्यतश्च प्राण-हृदय-मनसां प्रस्फुटनेन पुनरपि ऊर्ध्वं परमात्मनः अनन्ततां प्रति आरोहन्ति। यत् किमपि श्रीमाता पश्यति, अनुभवति, स्वान्तराद् अभिवर्षति च तेनैव अस्मिन् ब्रह्माण्डे पार्थिवक्रमविकासे च यद् भवितव्यं तत्सर्वं निर्धारयन्ती सा तत्र देवानां परस्तात् अवतिष्ठते। तस्याः सर्वाः शक्तयः व्यक्तित्वमूर्तयश्च कार्यार्थं तत्समक्षम् आविर्भवन्ति। तासाम् अंशसम्भूतीः सा अधस्तात् एषु निम्नलोकेषु प्रेषयति माध्यस्थ्यकार्याय, शासनाय, युद्धाय, विजयाय, एषां युगचक्र-परम्पराणां पुरोनयनाय परिवर्तनाय च, अखिललोकशक्तीनां वैयष्टिक-सामष्टिक-कार्यदिशां निर्देशनाय च। इमाः अंश-सम्भूतयः एव ताः अनेकाः दिव्याः आकृतयः व्यक्तित्वमूर्तयश्च यासु जनाः श्रीमातरं नानानामभिः युगयुगान्तरेभ्यः पूजितवन्तः। अपि च, यथा सा आभिः शक्तिभिः तासाम् अंशसम्भूतिभिश्च

ईश्वरस्य विभूतिभ्यः मनांसि शरीराणि च प्रकल्पयति घटयति च तथैव सा आभिः स्वविभूतीनां शरीराणि मनांसि च सज्जीकरोति विनिर्माति च येन सा अस्मिन् स्थूलजगति मानवचेतनायाः छद्मवेशे च आत्मनः शक्तेः, गुणस्य सन्निधेश्च कामपि ज्योतिःकलां प्रकाशयितुं पारयेत्। अस्याः पार्थिवलीलायाः सर्वाण्यपि दृश्यानि तया रचितम्, आयोजितम्, विश्वदेवान् स्वसहायकान् कृत्वा स्वयं च प्रच्छन्ननटी भूत्वा अभिनीतं नाटकम् इव।

श्रीमाता न केवलम् ऊर्ध्वतः एव सर्वस्य शासनं करोति परं सा इदं त्रिधाभिन्नं निम्नतरविश्वम् अपि अवतरति। निर्व्यक्तिकतया अत्रत्याः सकलपदार्थाः, अज्ञानस्य क्रियाः अपि अवगुण्ठित-शक्तिरूपा सा एव, सर्वेऽपि तस्याः एव हसितोपादानरूपा सृष्टिः। ते तस्याः एव प्रकृतिदेहः प्रकृति-शक्तिश्च। तेषाम् अस्तित्वकारणम् इदम् एव यत् अनन्तस्य सम्भाव्यरूपेषु अन्तर्गतं किमपि अनिर्वाच्यं वस्तु निष्पादयितुं परमेश्वरस्य रहस्याज्ञया प्रेरिता सा महायज्ञे आत्मबलिदानाय सम्मता भूत्वा अविद्यायाः आत्मानं रूपाणि च छद्मवेशवत् धारितवती। किञ्च व्यक्तिरूपेणापि सा करुणावशात् प्रह्वीभूय अत्र अस्मिन् अज्ञाने अवतीर्णा येन सा अज्ञानं ज्योतिः प्रति

नेतुं शक्नुयात्, अस्मिन् भ्रमे प्रमादे च येन सा उभयम् अपि सत्ये परिणमयेत्, अस्मिन् मृत्युसाम्राज्ये येन सा इदं देवोपम-जीवने परिवर्तयेत्, अस्मिन् जगत्क्लेशे अस्य दुराग्रहि-शोक-सन्तापजाले च येन सा सकलम् अपि आत्मनः अतिभव्यानन्दस्य रूपान्तरकारिप्रहर्षे परिसमापयितुं पारयेत्। स्वसन्ततौ प्रगाढ-प्रचुरप्रीतिवशात् तया अस्याः तमसायाः प्रावरणं स्वीकृतम्, अज्ञानान्धकारशक्तिराजेः आक्रमणानाम् उत्पीडकप्रभावाणां च सहनं सानुग्रहम् अङ्गीकृतम्, मृत्योः अन्यतमरूपस्य जन्मनः द्वारमध्यात् निष्क्रमणम् अपि परिसोढम्, सृष्टेः व्यथा-वेदना-दुःखकष्टानि परिगृहीतानि, यतो हि तस्याः इदं प्रतिभातं यत् इत्थंमेव एषा सृष्टिः ज्योतिः, आनन्दम्, सत्यं शाश्वतजीवनं प्रति उन्नेतुं शक्यते। अयम् एव सः महायज्ञः यः कदाचित् पुरुषयज्ञः इति कथ्यते, किन्तु सुगभीरतर-दृष्ट्या एषः प्रकृतेः सर्वस्वमेधः, भगवत्याः श्रीमातुः आत्माहुतिः।

श्रीमातुः चत्वारि महारूपाणि; तस्याः याः प्रमुखाः शक्तयः व्यक्तित्वमूर्तयश्च तासु चतस्रः अस्य विश्वस्य तत्कृतपरिचालने, पार्थिवलीलया सह तस्याः व्यवहारेषु च अग्रतः वर्तन्ते। तासु एका निश्चलविशालता, सर्वग्राहिप्रज्ञा, प्रशान्तमङ्गलमयता, अतुलनीयः सार्वभौममहिमा, सर्वशासनकारी गरिमा इत्येषां

विग्रहः। द्वितीया तस्याः विभास्वरवीर्यम्, अदम्यावेगः, क्षात्रभावः, सर्वजयिसङ्कल्पः, प्रचण्डवेगः, जगत्प्रकम्पिका प्रलयङ्करी शक्तिः इत्येषां विग्रहः। तृतीया खलु शुभ्रोज्ज्वला, माधुर्यमयी आश्चर्यमयी च यतो हि तस्यां सन्ति सौन्दर्य-सामञ्जस्य-सुचारुलयानां गहनरहस्यम्, सूक्ष्म-दुरवगाह-वैभवम्, दुर्निवारम् आकर्षणम्, सम्मोहिका लावण्यसुषमा। चतुर्थी च अन्तरङ्ग-ज्ञान-लाभस्य, निर्दोष-निष्प्रमाद-कर्मणः, सर्वविषयेषु प्रशान्त-यथातथ-पूर्णताप्राप्तेः निबिड-सुगभीर-सामर्थ्येन विभूषिता। ज्ञानम्, बलम्, सामञ्जस्यं पूर्णता च तासां विभिन्नाः गुणात्मकशक्तयः। श्रीमातुः व्यक्तित्वमूर्तयः स्वात्मना सह इमाः शक्तीः अस्मिन् जगति आनयन्ति, स्वविभूतिषु मानवीय-छद्मरूपेण प्रकाशयन्ति ये च स्वीय-पार्थिवप्रकृतिं श्रीमातुः साक्षात्सजीवप्रभावं प्रति उन्मीलयितुं प्रभवन्ति तेषु तेषाम् अधिरोहणस्य दिव्यकोट्यनुपातेन प्रतिष्ठापयन्ति। ताः चतस्रः वयं महेश्वरी, महाकाली, महालक्ष्मीः, महासरस्वती इति चतुर्भिः महानामभिः कीर्तयामः।

राजराजेश्वरी महेश्वरी चिन्तकमनसः सङ्कल्पशक्तेश्च ऊर्ध्वं 'बृहति' समासीना इमे उभे उदात्ते, विशुद्धे महत्तरे च कृत्वा ज्ञानं वैशाल्यं च प्रापयति अथवा एते एतत्परतरज्योतिषा

परिप्लावयति। यतो हि एषा एव सा शक्तिमयी ज्ञानमयी च एका अद्वितीया या अस्मान् विज्ञानमयानि आनन्त्यानि, विश्व-व्यापि वैशाल्यम्, परमज्योतिषः महैश्वर्यम्, आश्चर्यकर-ज्ञाननिधिम्, श्रीमातुः सनातनशक्तीनाम् अपरिमेय-व्यापारं प्रति उन्मीलयति। सा अचञ्चला, परमाद्भुता, महिममयी चिर-प्रशान्ता च। न किमपि तां विचालयितुं शक्नोति यतो हि सर्वम् अपि ज्ञानं तस्यां निहितम्। यत् किमपि सा ज्ञातुम् इच्छति तत् तस्याः गुप्तं स्थातुं न शक्नोति। सर्वान् पदार्थान्, सकलजीवान्, तेषां स्वभावं सञ्चालकतत्त्वं च, जगतः विधानं युगचक्रं च, अखिलं विश्वं कथम् आसीत्, अस्ति, भविष्यति इति सकलम् अपि सा समग्रतया जानाति। अस्ति खलु तस्यां सा शक्तिः या वस्तुमात्रस्य साम्मुख्यं कृत्वा तत् अधिकरोति। न कोऽपि तस्याः विशालागोचरप्रज्ञाम् उदात्त-प्रशान्तशक्तिं च विरुद्ध्य अन्ततः विजयं प्राप्तुं शक्नोति। समत्वमयी, धीरा, अविचल-सङ्कल्पा सा मानवैः सह तत्तत्स्वभावसदृशम्, वस्तुभिः घटनाभिश्च सह तदीयशक्त्यनुसारेण तद्गतसत्यानुरूपं च व्यवहरति। नास्ति तस्यां पक्षपातः लेशतोऽपि, परन्तु सा परमेश्वरस्य आदेशम् अनुसरति। तदनुसारेण सा कांश्चित् समुद्धरति अन्यान् च अधः क्षिपति अथवा स्वस्मात् दूरम्

उत्सार्य तमसि पातयति। ज्ञानिभ्यः सा महनीयतराम् अधिक-ज्योतिर्मयीं च प्रज्ञां ददाति; ये अन्तर्दृष्टिसम्पन्नाः तेषां निकटे सा स्वमन्त्रणायाः रहस्यं प्रकटयति; विरोधिजनान् सा बलात् तदीयविरोधस्य फलभोगं कारयति; अज्ञान् मूढान् च सा तदीयान्धतानुसारेण परिचालयति। प्रत्येकजने सा तदीयप्रकृतेः नानाङ्गेभ्यः तेषां प्रेरणावश्यकतानुसारेण तत्प्रार्थितप्रतिफलानु-रूपं च प्रत्युत्तरं ददाति, तानि सञ्चालयति, तेषु अपेक्षित-बलप्रयोगं करोति अथवा तानि तत्पोषितस्वातन्त्र्यस्य वशे विसृजति येन तानि अज्ञानपथे समृद्धिं प्राप्नुवन्तु क्षयं यान्तु वा। यतो हि सा सर्वस्मात् परा, विश्वस्य केनापि वस्तुना न बद्धा न च तत्र आसक्ता। तथापि अन्यसकलापेक्षया तस्याः अस्ति जगज्जनन्याः मातृहृदयम्। अनन्ता अक्षया च तस्याः करुणा। तद्दृष्टौ सर्वेऽपि तस्याः शिशवः, एकस्यैव अद्वितीयस्य अंशाः, किं बहुना, असुराः, राक्षसाः, पिशाचाः अपि, विद्रोहिणः, विद्वेषिणश्चापि। तत्कृतं प्रत्याख्यानम् अपि स्थगनम् एव, तस्याः निग्रहाः अपि अनुग्रहः एव। किन्तु तदीयकरुणा तस्याः प्रज्ञाम् न अन्धयति, तस्याः कार्यं निर्धारितमार्गात् न विच्यावयति। यतो हि वस्तूनां सत्यम् एव तस्याः साध्यविषयः, ज्ञानम् एव तस्याः शक्तिकेन्द्रम्, दिव्य-

सत्यानुरूपम् अस्माकम् आत्मनः प्रकृतेश्च निर्माणं तस्याः नियोगः उद्योगश्च।

महाकाल्याः प्रकृतिः अन्या एव। न खलु बृहत्त्वं किन्तु तुङ्गत्वम्, न हि ज्ञानम् अपि तु बलवीर्यं तस्याः विलक्षण-गुणः। कार्यसिद्धये शक्तेः प्रचण्डावेगः, सकलाः सीमाः विघ्नबाधाश्च विचूर्णयितुं दिव्या रौद्रता तस्यां वर्तते। तस्याः सकलापि दिव्यता झञ्झासदृश-रुद्रकर्मणः प्रखरप्रतापरूपेण प्रस्फुरति; सा अस्ति क्षिप्रतायै, सद्यःफलप्रदप्रक्रियायै, सत्वर-साक्षात्प्रहाराय, स्वसमक्षस्थ-सकलविरोधिवस्तु-समुत्सारकाय सम्मुखाक्रमणाय। विकराला तस्याः आकृतिः असुरकृते, नितान्तं भयावहः निर्दयश्च तस्याः भावः भगवद्द्वेषिषु; यतो हि समस्तजगतां रणचण्डी सा सङ्ग्रामात् पश्चात्पदा न भवति। अपूर्णतां प्रति असहिष्णुः सा मनुष्ये यत् यत् तत्त्वम् अपूर्णत्वपरिहारे अनिच्छुकं तेन तेन सह सा कठोरं व्यवहरति, यत् किमपि दुराग्रहपूर्वकम् अज्ञाने अन्धकारे च ग्रस्तं तत् सर्वं प्रति सा सुदारुणा। विश्वासघातकताम्, मिथ्याचारम्, विद्वेषं प्रति तस्याः कोपः आशुः भीषणश्च। दुर्भावना तत्क्षणम् एव तस्याः कशाघातेन जर्जरिता भवति। भगवत्कार्ये उदासीनता, अवहेला, अलसता तस्याः असह्याः। असमयशायिनं दीर्घ-

सूत्रिणं च सा, प्रयोजने सति, सन्ताडनैः तीव्रवेदनाव्याकुलं विधाय तत्क्षणं जागरयति। सजवाः, ऋजवः निर्व्याजाश्च संवेगाः, निःसङ्कोचाः परमपूर्णाश्च व्यापाराः, प्रोज्ज्वलन्ती ऊर्ध्वगतिः अभीप्सा महाकाल्याः गतिवृत्तयः। तस्याः सत्त्वम् अदम्यम्, तदीया दृष्टिः सङ्कल्पशक्तिश्च पतङ्गराजोत्पतनवत् समुत्तुङ्गा सुदूरगामिनी च, क्षिप्रौ तस्याः पदक्षेपौ ऊर्ध्वपथे, प्रसारितौ तस्याः हस्तौ प्रहारार्थं परित्राणार्थं च। यतो हि सा अपि माता; तस्याः स्नेहः तदीयक्रोधवत् तीव्रः, तस्याः करुणा गहना प्रगाढा च। यदा सा साधकस्य अन्तरे स्वसामर्थ्यसहितं पदाधानाय अनुमन्यते तदा संस्तम्भिकाः सकलबाधाः आक्रमणकारि-रिपवः वा असंहतवस्तुवत् क्षणेन विचूर्ण्यन्ते। यद्यपि तस्याः क्रोधः विरोधिनां भयङ्करः, तस्याः दमनकारि-प्रचण्डता दुर्बलस्य कातरस्य च पीडाकरी तथापि सा महताम्, शक्तिमताम्, उदारचरितानां प्रिया पूजिता च। यतो हि ते अनुभवन्ति यत् तस्याः आघाताः तेषां भौतिकाधारे विद्यमानं विद्रोहितत्त्वं सामर्थ्ये पूर्णसत्ये च परिणमयन्ति, वक्रं कुटिलं च वस्तुजातं मुद्गरप्रहारैः ऋजूकुर्वन्ति, अशुद्धं दोषयुक्तं वा सकलम् अपि समुत्सारयन्ति। तस्याः अनुग्रहात् यत् कार्यम् एकदिनेन सिध्यति, तां विना तत् बहुशताब्दिसाध्यं स्यात्; तां

विना आनन्दः विशालः गभीरश्च अथवा मृदुलः, मधुरः सुन्दरश्च भवेत् नाम, किन्तु सः स्वकीयानिर्वचनीय-प्रगाढतायाः प्रज्वलदुल्लासेन विरहितः एव स्यात्। ज्ञानाय सा विजित्वर-शक्तिं प्रददाति, सौन्दर्ये सामञ्जस्ये च सा समुच्चाम् ऊर्ध्वारोहिणीं च गतिं समानयति, सिद्धेः मन्द-दुःसाध्य-प्रयासाय सा तं प्रवेगं प्रयच्छति यः अस्माकं शक्तिं बहुगुणितां कृत्वा दीर्घमार्गं लघूकरोति। परमानन्दात्, उच्चतम-शिखरात्, उदात्ततम-लक्ष्यात्, विशालतम-दृष्टेः अवरं किमपि तां तर्पयितुं न शक्नोति। अतः तस्याम् एव अस्ति भगवतः विजयिनी शक्तिः। यदि महती ध्येयसिद्धिः न खलु उत्तरकाले अपि तु अधुनैव प्राप्तुम् इष्यते तर्हि तस्याः प्रज्वलत्तेजसः, आवेगशक्तेः क्षिप्रगतेश्च प्रसादः अनिवार्यः एव।

केवलं ज्ञानं बलं च परात्परजनन्याः अनन्ये व्यक्तरूपे न स्तः। तस्याः प्रकृतेः अन्यत् सूक्ष्मतररहस्यम् अपि अस्ति। तद् विना ज्ञानं बलं च अपूर्णवस्तुमात्रं स्यात् पूर्णत्वं च सर्वाङ्गपूर्णं न भवेत्। तयोः ज्ञानबलयोः उपरि वर्तते शाश्वतसुषमायाः महाश्चर्यम्, दिव्यसामञ्जस्यानाम् अगम्यरहस्यम्, अप्रतिहत-सार्वभौम-श्रीसौन्दर्याकर्षणानां दुर्निवारं मोहकम् इन्द्रजालं यत् वस्तूनि, भूतानि शक्तीश्च समाकृष्य एकत्र संहतानि करोति,

सम्मिलनाय एकत्वसाधनाय च विवशीकरोति येन निगूढानन्दः अवगुण्ठनस्य पृष्ठतः लीलां कर्तुम्, तानि आत्मनः लयतालान् रूपविशेषान् च कर्तुं पारयेत्। इयम् एव महालक्ष्म्याः शक्तिः। भागवतशक्त्याः अन्यत् किमपि रूपं देहधारि-जीवानां हृदयाय अधिकम् आकर्षकं नास्ति। महेश्वरी पार्थिव-प्रकृतेः क्षुद्रतायै तथा शान्तनिश्चला, महत्तरा दूरतरा च प्रतीयते यथा सा उपगन्तुं धारयितुं वा नैव शक्यते। महाकाली पार्थिवप्रकृतेः दुर्बलताकृते तथा क्षिप्रा प्रचण्डा च यथा सा सोढुम् अपि न शक्यते। किन्तु महालक्ष्मीं प्रति सर्वेऽपि सोल्लासं सस्पृहं च उन्मुखाः; यतो हि सा भगवतः उन्मादकारि-माधुर्यस्य मोहनमन्त्रेण सर्वान् मोहयति। तस्याः सान्निध्यं गभीरानन्दः; हृदयमध्ये तस्याः अनुभूतिः जीवनस्य परमाह्लादे महाश्चर्ये च परिणतिः; प्रभाकरात् प्रभा इव श्रीः, शोभा, स्निग्धता तस्याः प्रवहन्ति। यत्र यत्रापि सा निजपरमाद्भुतदृष्टिं निबध्नाति स्वीयस्मितिमाधुर्यं वा स्रावयति तत्र तत्र अन्तरात्मा बन्दिग्राहं निगृहीतः सन् अगाधानन्दस्य गभीरतासु निमज्ज्यते। अयस्कान्तोपमः तस्याः करकमलयोः स्पर्शः, तयोः गूढः कोमलश्च प्रभावः देहप्राणमनांसि संस्करोति। यत्र सा पदं निदधाति तत्र मोहकानन्दस्य महाद्भुतधाराः प्रवहन्ति।

परम् अस्याः हृदयहारि-शक्तेः अभ्यपेक्षायाः पूरणम्, अस्याः सान्निध्यस्य सततधारणं वा न सुकरम्। मनसः अन्तरात्मनश्च सामञ्जस्यं सौन्दर्यं च, विचाराणां हृद्भावानां च सामञ्जस्यं सौन्दर्यं च, प्रत्येकं बाह्यकार्ये बहिर्मुखगतौ च सामञ्जस्यं सौन्दर्यं च, जीवनस्य तदीयपरिस्थितीनां च सामञ्जस्यं सौन्दर्यं च—इदम् एव महालक्ष्म्याः ईप्सितम्। यत्र अस्ति सृष्टेः निगूढानन्दस्य लयैः सह अन्तर्मैत्री, सर्वसौन्दर्यनिधेः आह्वानस्य प्रत्युत्तरम्, भगवदभिमुखानाम् अनेकजीवनानां सुसंवादः, ऐक्यं प्रसन्नप्रवाहश्च तत्र, तस्मिन् वातावरणे, सा स्थातुं सम्मता भवति। किन्तु यत् किमपि कुरूपम्, कुत्सितं कदर्यं च, यत् किमपि दीनम्, मलिनम् अमेध्यं च, यत् किमपि नृशंसम् असंस्कृतं च, तत् सर्वं तस्याः शुभागमनम् अपाकरोति। यत्र प्रेम सौन्दर्यं च न स्तः प्रादुर्भवितुं वा न इच्छतः तत्र सा पदार्पणं न करोति। यत्र ते हीनतरवस्तुभिः सह मिश्रिते विरूपिते च ततः सा सत्वरम् एव विमुखीभूय निवर्तते अथवा स्ववैभवानि वर्षितुम् उत्सुका न भवति। यदि सा आत्मानम् ईर्ष्या-द्वेष-घृणा-स्वार्थ-असूया-कलहसङ्कुलेषु मानवहृदयेषु अवस्थितं पश्येत्, यदि देवार्पिते पावनपात्रे लोभ-कृतघ्नता-विश्वासघातकताः सम्मिश्रिताः स्युः, यदि

स्थूलवासना असंस्कृतकामना च भक्तिं भ्रष्टीकुर्याताम्, तर्हि ईदृशहृदयेषु दयामयी, सौन्दर्यमयी सा देवी न स्थास्यति। कयापि दिव्यजुगुप्सया गृहीता सा ततः निवर्तते यतो हि सा आग्रहशीला आयासपरा वा नास्ति। अथवा अवगुण्ठित-मुखमण्डला सा तत्रैव तावत् प्रतीक्षते यावत् इदं तिक्तं विषाक्तं च पैशाचिकतत्त्वं वर्जितं विलीनं च न जायते। विलीने च तस्मिन् सा स्वकीय-सुखद-सुप्रभावम् अभिनवतया प्रतिष्ठापयति पुनरपि। तापसोचिता रिक्तता रूक्षता च तस्याः न प्रिया, न वा हृदयस्य गभीरतरभावावेगानां दमनम्, नापि अन्तरात्मनः प्राणस्य च सौन्दर्यसेविनाम् अङ्गानाम् उग्रनिग्रहः। यतो हि प्रेमसौन्दर्यद्वारैव सा मानवस्कन्धे भगवतः धुरं निदधाति। तस्याः समुच्चतम-सृष्टिषु जीवनं स्वर्गीयकलायाः सुसमृद्धं कारुशिल्पं सम्पद्यते, सकलभुवनम् अलौकिकानन्द-स्य काव्यं भवति, संसारस्य समस्तसम्पदः एकीकृत्य सर्वोच्च-सुव्यवस्थायै प्रयुज्यन्ते। किं बहुना, अत्यन्तसामान्य-साधारण-वस्तूनि अपि तस्याः एकत्वसम्बन्धि-सहजज्ञानेन आत्मोच्छ्-वासस्पर्शेन च परमाद्भुतानि सम्पद्यन्ते। हृदये प्राप्तावकाशा सा ज्ञानम् आश्चर्यशिखराणि अधिरोहयति, समस्त-ज्ञानातीत-तीव्रानन्दस्य गुह्यरहस्यानि तस्य निकटे प्रकाशयति, भक्त्या सह

भगवतः सुतीव्राकर्षणस्य योगं साधयति, बलं शक्तिं च तं लयं शिक्षयति यः तयोः कर्मसामर्थ्यं सुपरिमितं सुसमञ्जसं च स्थापयति, सिद्धौ तां मोहिनीं सुषमाम् आदधाति यया सा शाश्वती सम्पद्यते।

महासरस्वती श्रीमातुः कार्यशक्तिः, सिद्धेः सुव्यवस्थायाश्च संसाधिका तस्याः आत्मसत्ता। चतसृषु कनिष्ठा सा कर्म-निष्पादने निपुणतमा स्थूलप्रकृतेः समीपतमा च। महेश्वरी विश्वशक्तीनां कार्यस्य विशालरूपरेखाः निर्धारयति, महाकाली तासां बलं प्रवेगं च प्रचोदयति, महालक्ष्मीः तासां लयतालान् परिमितिं च आविष्करोति, किन्तु महासरस्वती तासां संविधान-स्य कार्यनिष्पादनस्य च प्रत्येकं सूक्ष्मविवरणम्, अङ्गानां परस्पर-सम्बन्धम्, शक्तीनां फलसाधक-संयोजनम्, परिणाम-स्य सम्पूर्णसाफल्यस्य च अमोघयाथार्थ्यम्—एतत् सर्वम् अपि अधितिष्ठति। सकलवस्तूनां विद्या, कला क्रियाकौशलं च महासरस्वत्याः साम्राज्यम्। सिद्धकर्मिणः अन्तरङ्गं यथायथं च ज्ञानम्, सूक्ष्मबोधः धैर्यं च, सम्बोधिमनसः, सचेतनहस्तस्य विवेकशीलदृष्टेश्च निष्प्रमादता—इदं सकलम् अपि सा स्वप्रकृतौ सदैव सन्धारयति, तेभ्यः दातुं च पारयति यान् सा वृतवती। इयं शक्तिः समस्तजगतां समर्था, अक्लान्ता,

सावहिता, सुनिपुणा निर्मात्री, संविधात्री, प्रशासित्री, कर्मतन्त्र-वेत्त्री, दिव्यशिल्पिनी विभागकर्त्री च। यदा सा प्रकृतेः रूपान्तरसाधने नवनिर्माणे च प्रवर्तते तदा तस्याः कार्यं प्रयासपूर्णं सुसूक्ष्मं च भवति। तत् अस्माकम् अधीरचित्तस्य मन्दम् अन्तहीनं च प्रतिभाति प्रायशः। किन्तु वस्तुतः तत् स्थिरप्रसक्तम्, सर्वाङ्गपूर्णं सकलदोषरहितं च। यतो हि तदीय-कर्मगत-सङ्कल्पः सूक्ष्मविवेकी, अतन्द्रितः अश्रान्तश्च। अस्मासु सन्नता सा एकैकं स्वल्पम् अपि सूक्ष्मांशं पश्यति अभिमृशति च, प्रत्येकं सूक्ष्मं दोषं छिद्रं च, सूक्ष्मां कुटिलताम् अपूर्णतां वा अन्वेषयति, यत् कृतचरं यत् च अद्यापि कर्तव्यतया अवशिष्टं तत्सर्वं यथायथं विचारयति तोलयति च। नास्ति किमपि सुलघु आपाततुच्छं वा यत् तस्याः अवधानस्य अयोग्यम्, न किमपि कामं स्पर्शातीतं प्रच्छन्नवेशं वा अन्तर्लीनं वा सद् अपि तदीयदृष्टिम् अतिक्रमितुम् अलम्। प्रत्येकम् अपि अङ्गं पुनः पुनः सञ्चके निक्षिप्य रूपं रचयमाना सा तावत् प्रयस्यति यावत् तत् स्वसत्यस्वरूपं न प्राप्नुयात्, स्वयथार्थस्थाने सुप्रतिष्ठितं न स्यात्, स्वकीय-सुनिश्चित-प्रयोजनं च न पूरयेत्। वस्तूनां सतत-साध्यवसाय-व्यवस्था-पुनर्व्यवस्था-सम्पादने तस्याः दृष्टिः सर्वेषु अपि प्रयोजनेषु तेषां पूर्तिसाधनेषु

च समम् एव पतति, तस्याः अन्तर्बोधिः वार्यं वर्ज्यं च जानाति, योग्यकरणम्, योग्यकालम्, योग्यावस्थां योग्यप्रक्रियां च सफलतया निर्धारयति। अनवधानम्, अवहेलनम्, आलस्यं प्रति सा घृणापूर्णा; अन्यमनस्कम्, सरभसम् अव्यवस्थितं च आचरितं सर्वम् अपि कर्म, सर्वा अपि ग्राम्यता, न्यूनाधिकता, लक्ष्यभ्रष्टता, करणानां शक्तीनां च निखिलम् अपि मिथ्या अनुयोजनं दुरुपयोगश्च, अकृत्वा अर्धम् एव कृत्वा वा कार्याणां परित्यागः—एतत् सकलम् अपि तस्याः स्वभावस्य अप्रीतिकरं परकीयं च। यदा तस्याः कार्यं समाप्तं भवति तदा तस्मिन् किमपि विस्मृतं नावलोक्यते, कोऽपि अंशः अस्थानन्यस्तः, परिहृतः, सदोषस्थितौ परित्यक्तः वा न प्रतीयते; सर्वम् अपि सुदृढम्, निर्दोषम्, सम्पूर्णं स्तुत्यं च आभाति। सुपूर्णपूर्णतायाः न्यूनं किमपि तस्याः तृप्तिं न जनयति, स्वसृष्टेः सर्वाङ्गपूर्णतार्थम् अनन्तकालपर्यन्तं श्रमः आवश्यकः चेत् तम् अपि सोढुं सा प्रस्तुता। अतः सर्वासु अपि श्रीमातुः शक्तिषु सा एव मानवं प्रति, तस्य त्रुटिसहस्रं प्रति सर्वाधिकं सुचिरं च सहिष्णुतापरायणा। सदया, सस्मिता, सन्निहिता, सदासहाया सा, न जायते विमुखा निरुत्साहा वा अनायासम्, सत्यपि पुनः पुनः वैफल्ये सा दृढाग्रहपरा।

तदीयहस्तः अस्मभ्यं पदे पदे अवलम्बं ददाति यदि वयम् अनन्यसङ्कल्पाः, सरलाः निश्छलाः सत्यहृदयाश्च, यतो हि द्वैधचित्तं तस्याः न सह्यम्। तस्याः मर्मभेदी व्यङ्ग्यहासः मिथ्याभिनयम्, पाखण्डम्, आत्मवञ्चनं मिथ्याचारं च प्रति अतिनिष्ठुरः। अस्माकम् आवश्यकतापूरणे सा माता, सङ्कटेषु सुहृद्भूता, निरलसा प्रशान्ता च सचिवा मार्गदर्शिका च। स्वीय-समुज्ज्वल-स्मितेन सा विषादस्य, चित्तविक्षोभस्य अवसादस्य च मेघान् निरस्यति, मम साहाय्यं सततं सन्निहितम् इति अस्मान् सर्वदा स्मारयति, सनातन-सूर्यालोकं प्रति सङ्केतयति च। सा अस्मभ्यं सुदृढम्, शान्तं साभिनिवेशं च तां सन्तत-सुगभीर-प्रेरणां ददाति या अस्मान् पराप्रकृतेः सर्वाङ्ग-पूर्णतां प्रति प्रचोदयति। अन्यासां सर्वासाम् अपि शक्तीनां सकलं कार्यं स्वसम्पूर्णतार्थं ताम् एव अवलम्बते, यतो हि सा भौतिकाधारं सुदृढं करोति, अङ्गप्रत्यङ्गानाम् उपादानं सुनिष्पादयति, सत्तायाः सम्पूर्णम् अपि भवनं विनिर्माय तद् वर्मावृतम् इव सुदृढं करोति।

भगवत्याः श्रीमातुः अन्याः अपि महत्यः व्यक्तित्वमूर्तयः सन्ति, किन्तु तासाम् अवतारणम् अधिकतरं कठिनम्। ताः पृथिवीचेतनायाः क्रमविकासे तावता प्राधान्येन पुरतः

अवस्थिताः न सन्ति। तासु सन्ति काश्चन यासां सन्निधिः विज्ञानमयसिद्धये अपरिहार्यः। तत्रापि सुगुह्य-समूर्जितस्य प्रहर्षस्य आनन्दस्य च मूर्तिः अनिवार्यतमा। अयम् आनन्दः भगवत्प्रेम्णः परमपदात् प्रवहति। अयम् एव विज्ञानमयात्मनः उच्चतम-शिखराणां जडप्रकृतेः निम्नतम-गह्वराणां च मध्यवर्ति महद् अन्तरं दूरीकृत्य तानि सन्धातुं शक्नोति, आश्चर्यमय-परमदिव्यजीवनस्य द्वारोद्घाटिनीं कुञ्चिकां धरति, अद्यापि च निजनिभृतगुहाभ्यः विश्वस्य इतरसकलशक्तीनां कर्मणे अवलम्बं ददाति। किन्तु सीमाबद्धा, अहंयुक्ता, तमोग्रस्ता मानवप्रकृतिः आसां महाशक्तीनां सन्निधिं स्वात्मनि धारयितुम्, आसां प्रबलक्रियायाः आधारो भवितुं वा न शक्नोति। यदा ताः चतस्रः शक्तयः अस्माकं रूपान्तरिते मनसि, प्राणे देहे च स्वीय-स्वतन्त्र-सुसमञ्जस-गतेः प्रतिष्ठां कुर्वन्ति तदैव ताः अपराः दुर्लभतर-शक्तयः पार्थिवगतिधारायां प्रादुर्भवितुं शक्नुवन्ति विज्ञानमयं कर्म च तदैव सम्भवति। यतो हि यदा श्रीमातुः सर्वेऽपि विग्रहाः तस्याम् एव एकत्र अवस्थिताः अभिव्यक्ताश्च भवन्ति, तेषां पृथक् व्यापाराश्च सामञ्जस्यपूर्णे ऐक्ये परिणम्यन्ते, यदा च ते विग्रहाः तस्यां समुन्नीताः सन्तः स्वीयविज्ञानमय-दिव्यस्वरूपाणि प्राप्नुवन्ति तदा श्रीमाता

विज्ञानमय-महाशक्तिरूपेण प्रादुर्भवति, निजज्योतिर्मय-विश्वातीत-वैभवानि तदीयानिर्वचनीय-व्योम्नः वर्षन्ती वसुधा-तलं समानयति। तदा एव मानवप्रकृतिः सक्रियदिव्यप्रकृतौ परिवर्तितुं शक्नोति यतो हि तदा विज्ञानभूमिकायाः ऋतचितेः ऋतशक्तेश्च सकलानि मूलसूत्राणि संग्रथितानि भवन्ति जीवन-वीणा च सनातनस्य सङ्गीतं समस्वरेण वादयितुं सुयोग्या भवति।

यदि यूयम् इदं रूपान्तरं प्राप्तुकामाः तर्हि विना द्वैधं प्रतिरोधं वा आत्मानं श्रीमातुः तदीयशक्तीनां च हस्तयोः न्यस्यत, युष्मदन्तरे च निर्बाधं निजकार्यसम्पादनाय तस्यै अनुमतिं प्रदत्त। त्रीणि वस्तूनि युष्माकम् आवश्यकानि— सचेतनता, सुनम्यता निःशेषसमर्पणं च। मनसि, अन्तरात्मनि, हृदये, प्राणे, किं बहुना, देहस्य कोषाणुषु युष्माभिः सचेतनैः भाव्यम्; श्रीमातुः तदीयशक्तीनां च, तासां क्रियाकलापस्य च प्रत्यक्षज्ञानं प्राप्तव्यम्। यद्यपि सा युष्माकम् अन्धकारदशायाम् अपि, अचेतनेषु अङ्गेषु क्षणेषु चापि युष्मासु कार्यं कर्तुं शक्नोति करोति च तथापि तत् तादृक् न भवति यादृक् तया सह युष्माकं जीवज्जाग्रत्सायुज्ये सति सञ्जायते। सकलापि युष्माकं प्रकृतिः तस्याः स्पर्शं प्रति सुनम्या स्यात्— न सा तथा

प्रश्नं कुर्यात् यथा अज्ञानि, स्वाभिमानि मनः प्रश्नम्, संशयं विवादं च करोति, आत्मज्ञानलाभस्य स्वपरिवर्तनस्य च विरोधि भवति; न सा स्वचेष्टानां विषये तथा दुराग्रहं कुर्यात् यथा मानवस्य प्राणः करोति, स्वीय-समुच्छृङ्खल-कामनाभिः अशिवसङ्कल्पेन च भागवतप्रभावमात्रस्य साभिनिवेशं विरोधम् आचरति। नापि सा भौतिकचेतनावद् बाधिका स्यात्—यथा मानवस्य दैहिकचेतना बाधां जनयति, अन्धताक्षुद्रतागते निजसुखे सुदृढसंसक्ता भूत्वा तादृशप्रत्येकस्पर्शस्य विरुद्धम् आक्रोशति यः तस्याः निर्जीवजीवनचर्याम्, जडतन्द्रां घोरनिद्रां वा व्याहन्ति, तथा युष्मत्प्रकृतिः बाधिका न स्यात्, जाड्या-शक्तितमोरूपदुर्गे सुगुप्ता, तस्मिन् गाढसक्ता च न तिष्ठेत्। निजबाह्यान्तरसत्तायाः निःशेष-समर्पणं युष्मत्प्रकृतेः समस्त-भागेषु इमां सुनम्यताम् आनेष्यति; ज्ञानम्, ज्योतिः, शक्तिः, सामञ्जस्यम्, सौन्दर्यम्, पूर्णत्वम् इति ऊर्ध्वतः अवतरन्ति एतानि प्रति निरन्तरोन्मीलनेन युष्मासु सर्वत्रापि चैतन्यं जागरिष्यति। किं बहुना, देहोऽपि प्रबुद्धः भविष्यति, तस्य चेतना पूर्ववत् अन्तश्छन्ना न तिष्ठन्ती विज्ञानस्य अतिचेतन-शक्त्या सह ऐक्यं प्राप्स्यति; ऊर्ध्वतः, निम्नतः, समन्ततः तस्याः शक्त्याः प्रवाहैः आत्मानं व्याप्यमानम् अनुभविष्यति,

परमप्रेम्णः परमानन्दस्य च अनुभूत्या पुलकिता भविष्यति।

किन्तु सावधानाः भवत, भगवतीं श्रीमातरं निज-क्षुद्र-पार्थिव-मनसा अवबोद्धुं परीक्षितुं च मा चेष्टध्वम्। यतो हि युष्माकं क्षुद्रमनः स्वक्षेत्रातिग-वस्तून्यपि स्वप्रमाप-प्रतिमानानाम्, स्वीयसङ्कुचित-तर्कवितर्काणाम्, स्खलनशील-संस्काराणाम्, निजागाधसमुद्भताज्ञानस्य स्वकीय-सुतुच्छ-स्वात्मविश्वासि-ज्ञानस्य च वशम् आनेतुं कामयते। स्वस्य अर्धप्रकाशितान्धकारस्य कारागारे बन्दीभूतं मानुषं मनः भागवतशक्तेः पदक्रमाणां बहुमुखीं स्वतन्त्रगतिम् अवबोद्धुं न समर्थम्। तस्याः दृष्टेः क्रियायाश्च क्षिप्रता जटिलता च मनसः प्रस्खलद्-बोधशक्तिम् अतिक्रामतः। मनसः गतेः मापेन तस्याः गतेः मापनम् असम्भवम्। श्रीमातुः अनेक-विभिन्न-व्यक्तित्वेषु जायमानं द्रुतपरिवर्तनम्, तया कृतं लयनिर्माणं लयभङ्गविधानं च, स्वगतेः तीव्रीकरणं मन्दीकरणं च, नानाजनानां समस्यासमाधानाय विविधविधीनाम् अवलम्बनम्, साम्प्रतम् अस्याः ततश्च कस्याश्चित् अपरस्याः सरणेः स्वीकरणम्, परिहरणं तयोः समाहरणं च—एभिः तदीयव्यापारैः विमूढं मनः अविद्यायाः अतिगहनावर्तमध्यात् परमज्योतिः प्रति चक्राकारं सवेगं च समूर्ध्वं प्रयान्तीं परा-

शक्तेः पद्धतिम् अवबोद्धुं न पारयिष्यति। अतः वरमिदं यत् यूयं स्वात्मानं तां प्रति उन्मीलयत, चैत्यप्रकृत्या ताम् अनुभूय, चैत्यदृष्ट्या तां साक्षात्कृत्य सन्तृप्ताः भवत, यतो हि केवलं चैत्यप्रकृतिः चैत्यदृष्टिश्च दिव्यसत्यस्य आह्वानं प्रति सरलं साक्षात् च उत्तरं प्रदत्तः। तदा श्रीमाता स्वयमेव युष्माकं मनः, हृदयम्, प्राणं देहचैतन्यं च तत्तच्चैत्यतत्त्वैः उद्भासयिष्यति, स्वीयस्वभावं स्वपद्धतीश्चापि प्रकाशयिष्यति तेषां पुरतः।

अथ अस्माकम् अज्ञानमय-मानसं भागवतशक्तेः इदम् अपेक्षते यत् सा सदा सर्वज्ञता-सर्वशक्तिमत्ता-सम्बन्ध्यस्मदीय-स्थूलासंस्कृत-धारणानुसारेण स्वकार्यं कुर्यात् इति। किन्तु तस्य इयम् अपेक्षा भ्रान्तिरेव, परिहर्तव्या एषा सर्वथा। यतो हि अस्माकं मनः चमत्कारिशक्त्याः, अनायाससिद्ध्याः दुर्निरीक्ष्य-प्रभायाश्च प्रभावं पदे पदे अनुभवितुम् अभिलषति। अन्यथा भगवान् अत्र अस्ति इति विश्वसितुं तत् न पारयति। श्रीमाता अविद्यया सह अविद्यायाः क्षेत्रेषु एव व्यवहरन्ती आस्ते; अवतीर्णा सा तत्र, न हि सा सर्वथा उपरि आसीना। स्वकीयां प्रज्ञां शक्तिं च सा अंशतः संवृणोति, अंशतः विवृणोति, बहुवारं ते उभे अपि स्वस्य यन्त्रेभ्यः विभूतिभ्यश्च प्रतिसंहरति। मनश्चैत्य-प्राण-शरीराणां रूपान्तरसाधनार्थं सा जिज्ञासुमनसः,

अभीप्सुचैत्यस्य, युयुत्सुप्राणस्य, पाशबद्ध-पीडाकुल-पार्थिव-प्रकृतेः सरणिम् अनुसरति। सन्ति केचन विनियमाः ये परमेच्छाशक्त्या निर्धारिताः, सन्ति केचन जटिलग्रन्थयः ये शिथिलीकर्तव्याः, ये च सहसा संछिद्य प्रक्षेप्तुं न शक्याः। असुर-राक्षसौ अस्यां विकसन्त्यां पार्थिवप्रकृत्यां प्राप्ताधिकारौ। तयोः साम्मुख्यं विजयश्च तयोरेव समयधर्मान् अनुसृत्य तदीये चिरविजिते क्षेत्रे राज्ये च कर्तव्ये। अस्माकम् अन्तःस्थित-मानुषतत्त्वस्य मार्गनिर्देशः प्रस्तुतिश्च तथा करणीया यथा तत् स्वसीमाः अतिक्रमितुं शक्नुयात्। तत् खलु तथा दुर्बलं तमोग्रस्तं च यथा तत् स्वस्माद् अतीव परतरं दिव्यस्वरूपं प्रति सहसा उन्नेतुं नैव शक्यम्। भगवतः चेतना शक्तिश्च सदैव विद्यमाने स्तः, साधनायाः अवस्थानुसारेण यत् आवश्यकं तत् ते प्रतिक्षणं कुरुतः, विधिनिर्धारितं पदं पुरः न्यस्यतः सर्वदैव, अपूर्णतामध्ये भाविपूर्णतायाः रूपं च प्रकल्पयतः। किन्तु युष्मासु विज्ञाने अवतीर्णे सत्येव श्रीमाता विज्ञानात्मक-शक्ति-रूपेण युष्माकं विज्ञानमय-प्रकृतिभिः सह साक्षात् व्यवहर्तुं समर्था। यदि यूयं स्वमानसम् अनुसरथ तर्हि तत् युष्मत्समक्षम् आविर्भूताम् अपि श्रीमातरं न अभिज्ञास्यति। अनुस्रियताम् अन्तरात्मा न तु मनः—अन्तरात्मा यः सत्यस्य

आह्वानं प्रति उत्तरं ददाति, न तु निजमनः यत् प्रतीयमानरूपेषु समुत्पतति। स्थाप्यताम् आस्था भागवतशक्तौ, निर्मोक्ष्यति सा युष्माकम् अन्तरस्थ-दिव्यतत्त्वानि, घटयिष्यति च सर्वं भागवतप्रकृतेः अभिव्यक्तिरूपेण।

विज्ञानमय-रूपान्तरं विधिनिर्दिष्टम्, अवश्यम्भावि च तत् पार्थिवचेतनायाः विकासक्रमे। यतो हि अस्याः ऊर्ध्वारोहण-गतिः न समाप्ता मनश्च अस्याः चरमशिखरं नास्ति। किन्तु इदं परिवर्तनं सिद्धम्, साकारं स्थायि च स्यात् इति एतदर्थं प्रथमम् आवश्यकं निम्नतः आह्वानम्। तत् च अनेन सङ्कल्पेन समन्वितं स्यात् यत् समागते दिव्यज्योतिषि तस्य अभिज्ञान-पूर्वकं स्वागतं करिष्यते, न तु निराकरणम्; ततश्च आवश्यकी ऊर्ध्वतः परमेश्वरस्य अनुमतिः। अस्याः अनुमतेः निम्नतः आह्वानस्य च माध्यस्थ्यकारिणी शक्तिः खलु भगवत्याः श्रीमातुः उपस्थितिः शक्तिश्च। न खलु कोऽपि मानुषः प्रयासः न च कापि मानव-तपस्या किन्तु केवलं श्रीमातुः शक्तिरेव आवरणं विदारयितुम्, आच्छादनं छेत्तुम्, देहाधारस्य नवरूपं निर्मातुम्, असत्यान्धकार-शोकसन्ताप-मृत्युसङ्कुले अस्मिन् संसारे सत्यम्, ज्योतिः, दिव्यजीवनम्, अमृतस्य आनन्दं च अवतारयितुं समर्था।

# शब्द-विवृतिः

| | |
|---|---|
| विनियमः | condition |
| सञ्चकः | mould |
| अधियाचना | claim |
| पणबन्धः | bargain |
| अभ्यर्थना, अभ्यपेक्षा | demand |
| विज्ञानमय-सृष्टिः | supramental creation |
| रूपान्तरम् | transformation |
| संवेगाः | impulses |
| सत्त्वम् | spirit |
| अयस्कान्तः | magnet |
| अभिमृशति | touches |
| अनुयोजनम् | adaptation |
| अपरा प्रकृतिः | lower nature |
| चैत्यप्रकृतिः | psychic nature |

सजवाः —क्षिप्राः । ऋजवः —सरलाः । निर्व्याजाः —निश्छलाः ।